শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে দ্বিষষ্টিতমং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে দ্বিষষ্টিতমং দশকম্॥

## ইন্দ্রযাগৱিঘাতৱর্ণনম্

কদাচিদ্গোপালান্ ৱিহিতমখসম্ভারৱিভৱান্
    নিরিক্ষ্য ৎৱং শৌরে মঘৱমদমুদ্ধ্ৱংসিতুমনাঃ।
ৱিজানন্নপ্যেতান্ ৱিনযমৃদু নন্দাদিপশুপা -
    নপৃচ্ছঃ কো ৱাঽযং জনক ভৱতামুদ্যম ইতি॥ **62.1** ॥

বভাষে নন্দস্ত্বাং সুত ননু ৱিধেযো মঘৱতো
    মখো ৱর্ষে ৱর্ষে সুখযতি স ৱর্ষেণ পৃথিৱীম্।
নৃণাং ৱর্ষাযত্তং নিখিলমুপজীৱ্যং মহিতলে
    ৱিশেষাদস্মাকং তৃণসলিলজীৱ্যা হি পশৱঃ॥ **62.2** ॥

ইতি শ্রুৎৱা ৱাচং পিতুরযি ভৱানাহ সরসং
    ধিগেতন্নো সত্যং মঘৱজনিতা ৱৃষ্টিরিতি যৎ।
অদৃষ্টং জীৱানাং সৃজতি খলু ৱৃষ্টিং সমুচিতাং
    মহারণ্যে ৱৃক্ষাঃ কিমিৱ বলিমিন্দ্রায দদতে॥ **62.3** ॥

ইদং তাৱৎ সত্যং যদিহ পশৱো নঃ কুলধনং
    তদাজীৱ্যাযাসৌ বলিরচলভর্ত্রে সমুচিতঃ।
সুরেভ্যোঽপ্যুৎকৃষ্টা ননু ধরণিদেৱাঃ ক্ষিতিতলে
    ততস্তেঽপ্যারাধ্যা ইতি জগদিথ ৎৱং নিজজনান্॥ **62.4** ॥

ভৱদ্বাচং শ্রুৎৱা বহুমতিযুতাস্তেঽপি পশুপাঃ
    দ্বিজেন্দ্রানর্চন্তো বলিমদদুরুচ্চৈঃ ক্ষিতিভৃতে।

ব্যধুঃ প্রাদক্ষিণ্যং সুভৃশমনমন্নাদরযুতা -
স্ত্বমাদশ্শৈলাত্মা বলিমখিলমাভীরপুরতঃ॥ **62.5**॥

অবোচশ্চৈবং তান্ কিমিহ বিতথং মে নিগদিতং
গিরীন্দ্রো নন্বেষ স্ববলিমুপভুঙ্ক্তে স্ববপুষা।
অযং গোত্রো গোত্রদ্বিষি চ কুপিতে রক্ষিতুমলং
সমস্তানিত্যুক্তা জহৃষুরখিলা গোকুলজুষঃ॥ **62.6**॥

পরিপ্রীতা যাতাঃ খলু ভবদুপেতা ব্রজজুষো
ব্রজং যাবত্তাবন্নিজমখবিভঙ্গং নিশমযন্।
ভবন্তং জানন্নপ্যধিকরজসাঽঽক্রান্তহৃদযো
ন সেহে দেবেন্দ্রস্ত্বদুপরচিতাত্মোন্নতিরপি॥ **62.7**॥

মনুষ্যত্বং যাতো মধুভিদপি দেবেষ্ববিনযং
বিধত্তে চেন্নষ্টস্ত্রিদশসদসাং কোঽপি মহিমা।
ততশ্চ ধ্বংসিষ্যে পশুপহতকস্য শ্রিযমিতি
প্রবৃত্তস্ত্বাং জেতুং স কিল মঘবা দুর্মদনিধিঃ॥ **62.8**॥

ত্বদাবাসং হন্তুং প্রলযজলদানম্বরভুবি
প্রহিণ্বন্ বিভ্রাণঃ কুলিশমযমভ্রেভগমনঃ।
প্রতস্থেঽন্যৈরন্তর্দহনমরুদাদ্যৈর্বিহসিতো
ভবন্মাযা নৈব ত্রিভুবনপতে মোহযতি কম্॥ **62.9**॥

সুরেন্দ্রঃ ক্রুদ্ধশ্চেৎ দ্বিজকরুণযা শৈলকৃপযাঽ -
প্যনাতঙ্কোঽস্মাকং নিযত ইতি বিশ্বাস্য পশুপান্।
অহো কিন্নাযাতো গিরিভিদিতি সঞ্চিন্ত্য নিবসন্
মরুদ্গেহাধীশ প্রণুদ মুরবৈরিন্ মম গদান্॥ **62.10**॥

॥ ইতি শ্রীমন্নারাযণীযে দ্বিষষ্টিতমং দশকং সমাপ্তম্॥